Code no : 8 

HSS कथारचना (संस्कृतम्)

विषयः - विश्वासः ।

# प्रतीक्षा

"भवता आहूयमाना संख्या परिधौ नास्ति" - दूरवाण्यां एवमेव वारं वारं श्रुत्वा माधवः किञ्चिन्न अपि तु बहुधा चिन्ताक्रान्तः जातः। सः अम्बिकां विलोक्य इतोप्यधिकमस्वस्थः अभवत् । "रुद्रः क्व गतवान् स्यात्" इति ~~चिन्ता~~ प्रश्नः तं अत्यन्तं पीडितः। अम्बिका स्वभार्यायाः पार्वत्याः स्कन्धे कालाम्यकुसुममिव स्ववदनं स्थापयित्वा रुदति इति विज्ञाय सः सोदर्याः समीपं गतवान् । तां समाश्वसितुं वाणी अपि नास्ति इति सः जानाति। परन्तु कुतश्चिदुद्भूतं धैर्यं ~~संभूय~~ समीकृत्य सः उक्तवान् - "किम् सः शिशुः ? ~~सः~~ षोड़शवर्षीयः खलु। स्वमातरमपि पालयितुं सः समर्थः। अतः त्वं परिभ्रान्ता मा भवतु। सः शीघ्रादिशीघ्रमेव ~~प्रतिम~~ प्रत्यागमिष्यति।"

किन्तु ज्येष्ठस्य वचनमपि तं मातृहृदयस्य ~~दुःखबीजाग्नि~~ दुःखनीयमाक्रोशं शमयितुं पर्याप्तः न जातम्। रुद्रः तस्याः

एकमात्रपुत्रः। भर्तुः अकालवियोगेन अतिखिन्ना ~~अपि~~ सा पुत्रस्य विषये कापि न्यूनता न भवेयुः इति चिन्तया बहुकष्टानि स्वयं सहन्नपि तस्य मनोरथान् सर्वान् पूरयितुमतीव यत्नं कृतवती। ~~यदा~~ यदा तस्याः पतिः दिवाकरः पञ्चत्वं प्राप्तवान् तदा रुद्रः शिशुः आसीत्। ज्येष्ठाः सर्वे तस्याः द्वितीयैः विवाहः कारयितुं महता ~~यत्न~~ यत्नः कृतवन्तः। किन्तु कमपि प्रयोजनं नाभवत्। सा पुत्रस्य भविष्यस्य सः दृढनिश्चयः कृतवती यत् सा पुनर्विवाहः नैव करिष्यति इति। ~~रुद्रस्य माता~~ सा रुद्रस्य न केवलं माता अपि तु तातः अपि भूत्वा एवं सुतं पोषितवती। ~~आसीत्~~ पितृविहीनः इति कारणेन तं प्रति मातुः महती प्रीतिः। अत एव तस्य ~~सर्वेऽपि~~ सर्वेऽपि अभिलाषाणां पूरणं तया कृतम्।

सा कलालये अध्यापिका। रुद्रः ~~अपि~~ भाविनि काले श्रेष्ठः निपुणश्च वैद्यः भवतु इति तस्याः इच्छा। न केवलं तस्याः अपि तु दिवाकरः अपि स्वपुत्रः वैद्यः भवतु इति स्वप्नेन आन्दोलितः।

आसीत्। पुत्रं पाठयितुं तस्याः समयः नासीदित्यतः अध्यापिकामेकाम् तद् कार्याय नियोजितवती। पुत्रं पाठयितुं तस्य इच्छानां पूर्तीकरणं कर्तुञ्च धनसम्पादनमावश्यकम् ननु। अतः धनार्जनार्थं कर्मे सदा, निरता जाता। रुद्रस्तु मातरं 'अम्ब, अम्ब, इति आहूय "मह्यं तद् दास्यतु, मह्यं तद् अवश्यकम्" एवमेवं अनुदिनं वदति स्म। एवं यदा सः पञ्चदशवर्षीयः अभवत् तदा तस्य सकाशे द्विचक्रिका, जङ्गमदूरवाणी, सङ्गणकम्, एवमादयः बहूनि वस्तूनि आसन्।

यदा यदा अम्बिका तां पश्यति तदा तदा सः सङ्गणकस्य पुरतः एव। तदा सः औपचारिकता इव मन्दहासं कृत्वा सः वदति - "अम्ब, अद्य संगोष्ठ्याः निमित्तं अंतर्जालद्वारा लेखनानां अन्वेषणं करणीयम्" "अथवा" अन्यथा "अंतर्जालद्वारा किमपि पठामि"। तदा अम्बिकायाः नेत्रे तुष्ट्या अश्रुपूर्णे भवतः स्म। किन्तु

सा तुष्टि: अल्पकालाय एव जाता।

कदाचित् रुद्रस्य विद्यालयात् प्राचार्य: अम्बिकां आहूतवती। "शीघ्रमेव आगच्छतु" इति यदा स: कथितवान् तदा एव ~~अम्बिका~~ ~~था~~ अम्बिकाया: मनसि विद्युत्तरंगा: सञ्जाता: इव भाति। तथापि सा सद्य एव विद्यालयं प्राप्तवती। प्राचार्य: किञ्चित् सक्रोधं लिखित्वा तस्यै समर्पितवान्। प्राचार्य: रुद्रं विद्यालयत: बहिष्कृत: इति विज्ञाय अम्बिकाया: शरीरं कम्पमानं जातम्। तस्या: प्रश्नस्य पूर्वमेव सक्रोधं प्राचार्य: उक्तवान् - "पश्यतु भवती, भवत्या: पुत्रस्य पठनवस्तूनि..."

~~काचनिर्मितलघुभाजनेषु~~

प्राचार्यस्य पुरत: स्थिताया: अम्बिकाया: हृदयं ~~[illegible]~~ लघुखण्डानि छुरिकया कर्तयित्वा विभजित: इव भाति। सा पुत्रं सम्यक् अवलोकितवती। स: अर्धनिद्रायां स्थित: इव दृश्यते। स: लहरिवस्तूनां उपयोगेन अध: पतितवान् पर्वत: इव भाति। तस्य धूमपानं, सुरापानं च निशम्य सा बोधरहिता अभवत्।

प्राचार्यः नाम तस्याः भ्रातरमाहूय तेन सह समं रुद्रं अम्बिकां च गृहं प्रेषितवान्। गृहमागत्य सा अम्बा पुत्रस्य सङ्गणकम्, जङ्गमदूरवाणी च स्वीकृत्य यदा परिशीलितवती तदा तस्याः रुधिरं सर्वं नष्टं जातम्। सः अधमः जातः इति विश्वसितुमपि सा असमर्था जाता इव। चित्तस्य अंतर्भागतः कश्चन आक्रोशः बहिरागतः। अम्बिका स्वविधिं मनसा उच्चैः च शापवचनैः अभर्त्सयत्। पुत्रं चपेटिकामेकां दत्तवती च।

तदानीमेव माधवः उक्तवान् -
"किम् एवं ताडनेन? तस्य इच्छानुसारं त्वमेव व्यवहृतवती। अतः एव सः एवं अधः पतितः" इति। किन्तु वचनानन्तरं माधवः एकवारं पुनः चिन्तितवान्। भगिन्याः मातृहृदयः निर्मलः। अत एव सा एवं पुत्रं पालितवती। किन्तु यः विश्वासः सा रुद्रे कृता सः विश्वासः रुद्रः अद्य बभञ्ज। अम्बिका स्वदोषम् अङ्गीकृत्य क्रन्दितवती। सोदरी

समाश्वसितुं सः नोद्युक्तः। मनसि कश्चन भारः आदाय सः स्वगृहं प्रस्थितः। अम्बिका रुद्रः च तद्दिने किमपि न परस्परमुक्तवन्तौ।

अन्येद्युः सा ~~पुत्रस्य प्रकोष्ठं प्रति रुद्रं गत्वा~~ सम्यक् रीत्या समाधातुं तथा तस्य अवबोधः कारयितुं च निश्चित्य तस्य प्रकोष्ठं गतवती। परन्तु तत्र सः तया न दृष्टः। सा परिभ्रान्ता भूत्वा सर्वत्र अटितवती। न कोऽपि उपयोगः। अन्ते सा भ्रातरं आहूय वृत्तान्तं न्यवेदयत्। सः अपि रुद्रस्य अन्वेषणे मग्नः जातः।

"भवता आहूयमाना संख्या परिधौ नास्ति" इति पुनरपि निशम्य माधवस्य आकुलता पुनरपि अवर्धत। तदानीमेव तेषां आरक्षकपुरुषस्य स्थानीय नेता तत्र प्रवेशितः। सः सदुःखं कथितवान् यत् रेलयानस्य प्रहारेण अर्धरात्रौ मृतः। सः कश्चन बालः प्रायः रुद्रः भवेदिति। माधवस्य तत्र स्थितानां सर्वेषां विशेषतः अम्बिकायाः

मन: निर्जीव: जात:।
अम्बिका 'तद् न मम पुत्र:' इति
विलपन्ती उच्चै: क्रन्दितुमारब्धवती।
गृहस्य विलापयुक्तं वातावरणं नष्ट:
जात:, इदानीं तद् हृदयभेदकम् अभवत्।
मृतश्शरीरं दृष्टुं ते यानवीथ्यां
आतुरालयस्य शवप्रकोष्ठं
गतवन्त:। तत्र चेतनारहितगात्रेण य:
शयति स: तेषां रुद्र: इति सर्वे
ज्ञातवन्त:। किन्तु तदानीमपि अम्बिका
"स: मम रुद्र: नास्ति। मम विश्वास:
अस्ति। स: मां अत्र उपेक्ष्य न कदापि
गन्तुं शक्त:। स: पुन:
प्रत्यागमिष्यति, मम विश्वास: अस्ति।
मम पुत्र: एकदा महान् वैद्य: भवेत्,
मम विश्वास: अस्ति। स: मम सर्वेऽपि
अभिलाषानां पूरणं नूनं करिष्यति,
मम विश्वास: अस्ति। स: मम
प्रियपुत्र: अस्ति। स: प्रत्यागमिष्यति।
नूनं प्रत्यागमिष्यति, मम विश्वास:
अस्ति" इत्युक्त्वा सा बोधरहिता
जाता। तदापि सा अर्धनिद्रायां प्राप्ता

2017-18

इव "मम पुत्रः नूनं प्रत्यागमिष्यति।
मम विश्वासः अस्ति ........"||